क्रियासिद्धिः सत्त्वे भवति महताम् नोपकरणे ।

# संस्कृत बालसंवादः

वैशाखमासः५१११ (मे २००९) ॥ॐ॥ गुच्छः—३ सञ्चिका—१२ (पृष्ठसङ्ख्या४)

सरल-संस्कृताध्ययन-प्रसारार्थं मासपत्रिका ✆ ९४२२६२७५४२

सम्पादकः - *माधव बडे* / * सञ्चिकामूल्यम् - *रू. ३/-* * वार्षिकं शुल्कम् - *२५ रूप्यकाणि* ।

कोळथरे (४१५७१२) दापोली , जि. रत्नागिरी महाराष्ट्रम् ☎(०२३५८) २८५२२८

## ......तव ऊरुभङ्गं करिष्यति!

पाण्डवाः वनवासार्थं काम्यकवनमागत्य स्थिताः। तदा कदाचित् दुर्योधनः पुनः पाण्डवभयात् कर्णशकुनिदुःशासनैः सह कुटिलचर्चारतः आसीत्। पाण्डवाः पुनः कदाचिदपि न प्रत्यागन्तव्याः इति विचारमग्नः दुर्योधनः।

तदा कर्णः — ''तर्हि सद्यः एव वनं गत्वा यावत् शीघ्रं पाण्डवानां वधं कृत्वा दुर्योधनस्य प्रियं साधयेम।''इति। तथा निर्णीय तदर्थं ते ससैन्यं प्रस्थिताः अपि।

तदानीं हस्तिनापुरं भगवान् मैत्रेयः धृतराष्ट्रेन मेलितुम् आगतः। यथोचितम् आतिथ्यं स्वीकृत्य चर्चा आरब्धा।

धृतराष्ट्रः— हे भगवन्! कुरुजाङ्गल—देशागमनं सुखकरम् अभवत् खलु? पाण्डवानां सर्वं कुशलमस्ति न वा? ते दृढप्रतिज्ञः तत्र सन्ति किम्?

मैत्रेयः —तीर्थयात्रा—निमित्तेन अटन् काम्यकवनं प्राप्तवान्। तदा दैववशात् धर्मात्मनः युधिष्ठिरस्य मेलनावसरः प्राप्तः। तेन मेलितुं नैके मुनयः तत्र सम्प्राप्ताः। तदा ज्ञातं मया यत् भवतः पुत्राःबुद्धिभ्रष्टाः सन्ति। कपटद्युतेन महाभयङ्करः आपत्कालः सञ्जातोऽस्ति। पुत्राणां यथोचितं दमनं न करोति भवान्। क्रियाशून्यः सन् कथं जीवति भवान्?

पितृसमीपस्थं दुर्योधनम् उद्दिश्य—

महाबाहो, मद्वचनं अंगीकरोतु। पाण्डवैः सह न द्रोहः युक्तः। सर्वेषां प्रियकरं हितकरं च करोतु। पाण्डवाः शूराः बलशालिनः सत्यव्रतिनः च सन्ति। हिडिम्ब—बकादिनां विनाशकर्तारः ते किर्मीरं लीलया हतवन्तः। द्वन्द्वयुद्धेन जरासन्धः मारितः। वसुदेवपुत्रः श्रीकृष्णः तेषामाप्तः, द्रुपदपुत्राः ते श्यालाः सन्ति। बलवद्भिः सह वैरं न, किन्तु स्नेहेन आत्मनः हितं चिन्तयेत्।

तदा मुनिवचनस्य श्रवणं परिहार्य दुर्योधनःस्वसक्थिनः उपरि करतलाघातेन शब्दं कृत्वा गर्वेण हसन् वृषभ इव भूमिम् उद्खातवान्।

तेन मुनिः क्रुद्धः सन् आचम्य तं शप्तवान्—

''वृथाभिमानेन भवान् मद्वचनं न श्रुणोति।अतः तस्य फलमपि शीघ्रं प्राप्नुयात्। द्रोहेण एतेन भयङ्करं युद्धं भविष्यति,तदा भीमः गदाघातेन भवतः ऊरुभङ्गं करिष्यति।''

## विजयनगरम् !

आत्मीय बन्धो !

खिस्ताब्दे १३३६ तमे वर्षे धातृनामसंवत्सरे वैशाखे शु.सप्तम्यां गुरुवासरे स्वामिना विद्यारण्येन विजयनगरस्य शिलान्यासः कृतः।

तत्पूर्वं तुघलकेन राजा जम्बुकेश्वरः जित्वा बन्दीकृतः आनेगोन्दीदुर्गे। मलिक् नवाबः तत्र व्यवस्थार्थं नियुक्तः।

तदा स्वामिनः मार्गदर्शनेन हक्कबुक्कौ तरुणौ चातुर्येण दुर्गे प्रविष्टौ। मद्यधुन्दं नवाबं तं बन्दी—कृतवन्तौ। रक्तपातं विना ततः राजा जम्बुकेश्वररायः मुक्तः अभवत्।भगवतः विष्णोः वराहरूप—चिह्नाङ्कितः भगवद्ध्वजः दुर्गे स्थापितः। स्वराज्यप्रस्थापनात् पम्पा(हम्पी)क्षेत्रे योग्यं स्थलं निश्चित्य विजयनगरस्य शिलान्यासः अभवत्। तद्दिनं **वैशाख शुद्धा षष्ठी!**

वदतु संस्कृतम् !
सरलसंस्कृतम् !!
जयतु भारतम् !!!

वरुथिनी ११/५१११
श्रीक्षेत्रकोळथरे माधवः ।



## चित्रवर्णनम्

शब्दाधारेण चित्रवर्णनं ५/६ वाक्यैः चित्रवर्णन लिखतु ।

**मञ्जूषा २४—** न्यायाधीशः, उत्पीठिका, ग्रन्थः, न्यायवादी प्रतिवादी च।

संस्कृतवाक्यरचनां कर्तुं मनसि संस्कृतेन चिन्तनं भवति चेत् तत् सामर्थ्यं शीघ्रं प्राप्यते।तदर्थं कल्पितः अवसर एषः।

## धातु-परिचयः



वि+तॄ = वितर् = वितरति
(१ प.प.)

भगिनी बालेभ्यः प्रसादं **वितरति।**

**वितरति वितरतु वितरिष्यति वितीर्ण**
**वितीर्य वितरितुं वितरेत् वितरणीयम्।**

गतमासे रामजन्मोत्सवः अभवत्। तदा प्रसादनिर्माण— **वितरणस्य** दायित्वं मम पितुः आसीत्। अतः माता प्रसादार्थं दुग्धमोदकान् निर्मितवती।तदनन्तरं मम अग्रजाम् आहूय उक्तवती— शालिनि ऽऽवत्से, दुग्धमोदकाः एते गणनीयाः करण्डके च स्थापनीयाः। करण्डकद्वयम् आवश्यकम्। श्वः आवां कार्यक्रमे महिलाभ्यः **वितरीष्यावः**, पुरुषेभ्यः श्रीपादः तस्य मित्राणि च ते **वितरीष्यन्ति।**

शालिनी —अस्तु, अहं स्थापयिष्यामि।

अपरे दिने श्रीपादः करण्डकौ मन्दिरं नीतवान्। मध्याह्ने ११.०० वादने कीर्तनम् आरब्धम्।

श्रीपादः —(मित्रं वरुणम् आहूय) करण्डकेऽस्मिन् ४५० मोदकाः सन्ति। पुरुषेभ्यः अस्माभिः त्रिभिः मोदकाः **वितरणीयाः** खलु?

वरुणः —त्रिषु स्थलिकासु मोदकान् स्वीकृत्य **वितरामः।** श्यामः मुख्यसभामण्डपे **वितरेत्।** भवान् दक्षिणमण्डपे **वितरतु,** अहं वाममण्डपे तत्र प्रवेशद्वारपर्यन्तं सर्वत्र **वितरिष्यामि।**

१२.५० वादने रामजन्म—कीर्तनं समाप्तम्। त्रयः प्रसादं **वितरितुं** सिद्धाः आसन्। यथावकाशं पुरुषेभ्यः सर्वेभ्यः

*अग्रे द्वितीयस्तम्भे अनुवर्तते।*

## ....स्वस्थो रक्षार्थमायुषः।

### प्रकृत्या दिव्यमुदकम्!

आकाशात् पतितं तोयं (दिव्यमुदकं)शीतलं शुद्धं सुखकरं मधुरं विमलं लघु च अस्ति। भूमौ पतनानन्तरं यत्र पतति तदनुसारं प्रदेशानुगुणं गुणभेदः भवति।

वर्षाऋतौ नवागतं पर्जन्यजलं मधुरं, कफकरं गुरु च भवति।



शरदृतौ पर्जन्यजलं तनु अनभिष्यन्दि लघु चास्ति। ये सुकुमाराः सन्ति तथा च विशेषेण स्निग्धाहारसेवनं कुर्वन्ति तेभ्यः भोजनावसरे, खाद्यपदार्थेषु, लेह्यपदार्थेषु पेये च उत्तमम् इति उच्यते।

हेमन्ते पर्जन्यजलं स्निग्धं वीर्यवर्धकं बल—वर्धकं गुरु चास्ति। शिशिरे तत् कफवातनाशकं लघु च भवति।

वसन्ते कषायं मधुरं रूक्षं च, ग्रीष्मे पर्जन्यजलं कफकरं न भवति। अकाल—वृष्टिजलं सर्वथा दोषान् उत्पादयति।

*अग्रे प्रथमस्तम्भतः अनुवर्तते।* **धातुपरिचयः।**

ते प्रसादं **वितीर्णवन्तः।** तदा महिलाभ्यः प्रसादं वितरन्ती शालिनी तत्रागता। हस्ते स्थलिकासीत्।

शालिनी —भ्रातःपुरुषाणम् अपेक्षया महिलानां सङ्ख्या अधिका अस्ति। पुरुषेभ्यः **वितीर्य** करण्डके मोदकाः शेषाः स्युः न वा?

श्रीपादः —उपशतं वा सङ्ख्यया स्युः। एवं चेत् चिन्ता नास्ति, अहं ततः स्वीकरोमि।

माता —(तत्रागत्य) श्रीपाद, पुरुषेभ्यः सर्वेभ्यः प्रसादः वितरितः किम्?

श्रीपादः —आम्, वितरितः। पश्यतु शालिनी अपि प्रसादं वितीर्य प्रत्यागता। पित्रा स्वीकृतं दायित्वं यथोचितं निरूढम्। आकस्मिकतया सः अद्य अत्र उपस्थातुं न शक्तवान् किन्तु सायङ्काले प्रत्यागत्य सः सन्तुष्टः भविष्यति।

माता — आम्, ममापि बहु सन्तोषः अस्ति।

## ३ ....... न अत्र किमपि प्राप्यते!

एक: काक: आसीत्। कदाचित् बुभुक्षित: स:अन्नं प्राप्तुम् अ तत्र भ्रान्तवान् किन्तु न किमपि प्राप्तम्। तदा व्याकुल: सन् अग्रे अग्रे गमनावसरे मार्गे कुत्रचित् रोटिकाखण्डं प्राप्तवान्। चञ्चवा गृहीत्वा समीपस्थे वृक्षे स्थितवान्। रोटिका--खादनम् आरब्धवान्।



तदा तत्र कश्चन शृगाल: आगत:। दूरात् वृक्षे स्थितं काकं दृष्ट्वा स: —'' भो: काकराज! उत्तम: श्रेष्ठ: च गायक: खलु भवान्? अपि च बहु कालानन्तरं तव दर्शनमभवत्।गीतमेकं श्रावयतु कृपया'' इति।

शृगालवचनं श्रुत्वा काक: तं गीतं श्रावयितुम् उत्सुक: सन् झटिति रोटिकाखण्डंपादयो: अध: स्थापयित्वा गानम् आरब्धवान्--''काऽव काऽवकाऽऽव ''इति। तदा शृगालस्य धूर्तस्य कुटिलहेतु: विफल: अभवत्! अत: चकित: स: गानस्वरं श्रुत्वा चिन्तितवान्-- ''किं वा करणीयम्? समीचीनं नाभवत्, कश्चन अपर: उपाय: करणीय:, यत: रोटिकाखण्डं प्राप्स्यामि'' इति।

पुन: शृगाल: काकमाहूय, ''भो: एकाक्षवर्य! यथा उत्तम: गायक: भवान् तथैव नर्तक: अपि खलु? नृत्यकलायां निपुण: सन् नृत्यं न कुर्यात् इति कथं शक्येत? तदपि दर्शयतु कृपया!'' इति।

तदा काक: झटिति पादयो: अधस्तात् रोटिकाखण्डं चञ्चवा गृहीत्वा उभाभ्यां पादाभ्यां नर्तनम् आरब्धवान्। ''थैऽऽ थैऽतक्--थैऽऽ....''इति।

तस्मात् धूर्त किन्तु लज्जित: शृगाल: ज्ञातवान् यद्-- सद्य: काक: पूर्वमिव मूढ: नास्तीति दृश्यते, चतुरोऽपि अभवत्। तर्हि न किमपि प्राप्यते अत्र। अस्तु गच्छामि।



✍...... *प्रशान्त गमरे, दापोली।*

## जितेन्द्रिय: महर्षि: दधीच:

सत्ययुगे वृत्रासुर: देवलोके इन्द्रस्योपरि आक्रमणं कृतवान्। कालकेय: दैत्य: तस्य बहुभि: सहकारिभि: सह तस्य साहाय्यक: आसीत्। तदा तं प्रतिकर्तुम् मार्गदर्शनं प्राप्तुं इन्द्र: देवै: सह ब्रह्मण: समीपं गतवान्।

इन्द्र: —हे ब्रह्मन्! असुराणां प्रतिकारा वृत्रासुरस्य वधस्योपायं वदतु कृपया।

ब्रह्मा —दधीच: इति उदारचित्त: महर्षि: अस्ति। धर्मात्मा प्रसन्नचित्त: स: वरं दास्यति, तं प्रति गत्वा तदर्थम् अभियाचनां कुर्वन्तु। ''त्रैलोक्यस्य हिताय स्व—अस्थीनि ददातु'' इति। झटिति प्राणत्यागं कृत्वा अवश्य दास्यति स:। अविलम्बं तत्र गच्छन्तु।

तदा ब्रह्मण: वचनं श्रुत्वा इन्द्र: शीघ्रं तत: प्रस्थित:। सरस्वत्या: तटे दधीचाश्रम: आसीत्। तत्रागत्य ते मुनिश्रेष्ठं प्रणिपातं कृतवन्त:।

देवा: —धर्मात्मन् महर्षे! उन्मत्तस्य वृत्रासुरस्य वधार्थं सज्जा: वयम्। 'वरं देहि कृपया'

दधीच:—तथास्तु! प्रसन्नोऽहम्, यत् कामयते तद्वदन्तु, अवश्यं दीयते।

देवा: —तदर्थम् एक एव उपायोऽस्ति। भवत: अस्थीनि ददातु कृपया।

दधीच:—हे देवा:! अलं चिन्तया। भवतां हिताय यदस्ति तद् अनुक्षणं करोमि।

नरश्रेष्ठ: जितेन्द्रिय: महर्षि: दधीच: तत्र तेषां पुरत: एव प्राणत्यागं कृतवान्। झटिति तस्य अचेतनदेहात् देवा: अस्थीनि स्वीकृत्य मुदिता: सन्त: विश्वकर्मण: त्वष्टासमीपं गतवन्त:। आगमनस्य हेतुं ज्ञापयित्वा तस्मात् यथोचितं वज्रं प्राप्तवन्त:।

असुरवधार्थं युद्धमारब्धम्। भगवत: नारायणस्य सहयोगात् इन्द्रेण वज्राघातेन वृत्रासुर: मारित:। देवा: मुनय: च सर्वे मुदिता: अभवन्। दैत्या: नैके मृता: ,अपि च शेषा: मृत्युभयात् तत: पलायिता:।

---

**मञ्जूषा २३ -(उत्तरम्)**चित्रे...

वामत: वृक्ष: अस्ति, तस्य अध: फलानि पतितानि दृश्यन्ते। महिला फलानि चिनोति कण्डोले च स्थापयति। अपरत्र बालका: सन्ति। महिला तेभ्य: फलानि वितरति।

## यज्ञ: ३७. अमरकोशत: ...किञ्चित् !

यज्ञ: सवोऽध्वरो याग: सप्ततन्तुर्मख: क्रतु:।.

**द्वितीयकाण्डम् (ब्रह्मवर्ग:)१३६२-६४।।**

यज्ञ:, सव:, अध्वर:, याग:, सप्ततन्तु, मख:, क्रतु:च इति **यज्ञस्य** ७ शब्दा: सन्ति।

**४** छात्रेभ्यः शब्दरञ्जिनी - चित्रस्य आधारेण शब्दान्वेषणं करोतु ..३२



| | | | |
|---|---|---|---|
| भ्र | — | — | कः |
| • | • | ज्ञुः | • |
| वे | — | • | ल |
| — | • | • | — |
| • | वा | — | ङ्गः |

**शब्दरञ्जिनी — ३१**

मणिः, मधुकोषः, कोषः, कादम्बः, काञ्ची ।



☺ *हासः मास्तु कृपया !* ☺

## ... तस्मै देवाय एव ....!

वैद्यः —भवते जीवदानमहं दत्तवान् इति कथनं न युक्तम् इति मन्ये। देवकृपा सा,अत एव भवतः प्राणाः रक्षिताः।



रुग्णः —समीचीनं तत्, यदि भवता न किमपि कृतं तर्हि भवते शुल्कदानं न उचितं खलु? अतः अहं तस्मै देवाय एव तच्छुल्कं दास्यामि, चिन्ता मास्तु।

*...सौ. स्मिता प्रकाश सोमण, कोळथरे।*

## कस्मात् विलम्बः ?





काचित् महाविद्यालयच्छात्रा हेमा विलम्
वर्गे प्रविष्टा। तदा प्राध्यापकः —
" कस्मात् विलम्बेन आगता?"
लज्जया निःशब्दं स्थितवतीं तां
प्राध्यापकः उच्चैः
पुनः पृष्टवान् —
" कुशलम् अस्ति
न वा सर्वम्?" तदा सा —किं
करोमि? कश्चन युवकः म
अनुगतवान्।
प्राध्यापकः — अयि मूढे! एवं चेत् श
धावित्वा अत्र आगन्तव्य
आसीत् न वा?
हेमा — तदेव चिन्तितं मया, किन्तु सर्व
अशक्यमभवत्, यतः सः युवक
शनैः शनैः अनुगतवान्।

*...श्रीमती ज्योती रमाकान्त बागुल, बोरीवली।*

**बालसंवादस्य नवीनं ग्राहकत्वं नवीकरणं च**

१. श्री. यशवन्त सदाशिव वैशम्पायन,
डोम्बिवली ☎ (०२५१) २४३५२२४
२. श्री. विलास दिनकर इस्वलकर,
बोरीवली ☎ (०२२) २८९२०१७९
३. सौ. माधवी दीपक जोशी,
चिपळूण ☎ (०२३५५) २५१२१६

**इत्यत्र शुल्कधनदानेन शक्यते।**

**पठामि संस्कृतं नित्यं । वदामि संस्कृतं सदा । ध्यायामि संस्कृतं सम्यक्। वन्दे संस्कृतमातरम् ॥**

**सविधे** --

चतुर्वर्षात्मकमपि शुल्कधनं १००.०० रुप्यकाणि
प्रेषयित्वा नवीनं ग्राहकत्वं, नवीकरणं च शक्यते

येषां वार्षिकशुल्ककालावधिः **मे०९** पर्यन्तमस्ति
ते शुल्कं प्रेषयित्वा नवीकरणं कुर्वन्तु कृपय


**सकाशात् -**
**संस्कृत बालसंवादः**
कोळथरे जि.रत्नागिरी,
४१५७१२ महाराष्ट्रम्

**- RNI ( Ragistration) No.-**
**MAHSAN/2005/16878 Dt. 24.07.2006**

**- Postal Ragistration No.-**
**G/RNP/RTG - 18/2007 - 09**





Printed, Published and owned by Madhav Narayan Bade Printed at Pitruchaya Printing Press At & Post- Dapoli House No.213, Veer Savarkar Marg, Tahasil - Dapoli, Dist - Ratnagiri,Maharashtra State, Pin Code - 415712 a published from At & Post- Kolthare, House No. 159, Tahasil - Dapoli, Dist : Ratnagiri Maharashtra Stat Pin Code - 415712 Editor - Madhav Narayan Bade